# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-२ (SEM-3) | प्रश्नपत्र-७ | गुणा: - ७० |
| विषय:- साहित्यम् | CE-235 | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०१/१२/२०१६ | सन्दर्भग्रन्थ: - दशरूपकम् ( प्रथमद्वितीयप्रकाशौ ) | |

**॥ प्रथमान्विति: ॥**

**प्र-१ द्वयो: कारिकयो: ससन्दर्भं व्याख्या कार्या ।** **०८**

१. अधिकार: फलस्वाम्यमधिकारी च तत्प्रभु: ।
तन्निर्वृत्तमभिव्यापि वृत्ते स्यादाधिकारिकम् ॥

२. विलास: परिसर्पश्च विधूति शमनर्मणी ।
नर्मद्युति: प्रगमनं निरोध: पर्युपासनम् ॥

३. गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहु: ।
द्वादशाङ्ग: पताका स्यान्न वा स्यात्प्राप्तिसंभव: ॥

**प्र-२ दशरूपककारस्य धनञ्जयस्य परिचयो देय: ।** **०८**

**अथवा**

**नटकस्योत्पत्तिविषयका: सिद्धान्ता: विवेचनीया: ।**

**प्र-३ द्वयो: टिप्पणी कार्या ।** **०४**

१. प्रकरी ।
२. विलोभनम् ।
३. उपक्षेय: ।
४. बिन्दु: ।

**प्र-४ पञ्चानाम् एकवाक्येन उत्तराणि लिखत ।** **०५**

१. दशरूपकस्य प्रणेता कोऽस्ति?
२. अवस्था: कति?
३. धनञ्जयस्य पितुर्नाम किमस्ति?
४. अर्थप्रकृतय: कति?
५. महाकविधनञ्जय: कस्य राज्ञ: राजकविरासीत्?
६. कति रूपकानि सन्ति?
७. प्रासङ्गिकस्य कति भेदा: भवन्ति?

**॥ द्वितीयान्विति: ॥**

**प्र-५ कारिकाद्वयं व्याख्यायताम् ।** **०८**

१. इष्टस्यार्थस्य रचना गोप्यगुप्ति: प्रकाशनम् ।
राग: प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षय: ॥

२. नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तर: ।
दृश्यस्तु मधुरोदात्तरसभावनिरन्तर ॥

३. वृत्तवर्तिष्यमाणानां कथाशानां निदर्शकः ।

संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥

**प्र-६ नायकभेदं विलिख्य तत्प्रकारान् विस्तरेण विवेचयत ।** **०८**

**अथवा**

**अर्थोपक्षेपकाः के? तेषां स्वरूपं सोदाहरणं प्रतिपादनीयम् ।**

**प्र-७ द्वयोः टिप्पणी कार्या ।** **०२**

१. प्रतिनायकः ।

२. अपवारितम् ।

**प्र-८ लघूत्तरीयौ द्वौ प्रश्नौ साध्यौ ।** **०२**

१. नायकस्य कति भेदाः?

२. दशरूपकस्य प्रथमप्रकाशस्य कारिकासङ्ख्या का?

३. धृष्टः कः?

४. सात्त्विकपौरुषगुणाः कति?

**॥ तृतीयान्वितिः ॥**

**प्र-९ कारिकाद्वयं ससन्दर्भं व्याख्यायत ।** **०८**

१. छन्ननेतृप्रतीचारो नर्मगर्भोऽर्थहेतवे । अङ्गैः सहास्यनिर्हास्यैरेभिरेषाऽत्र कैशिकी ॥

२. श्रृङ्गारे कैशिकी, वीरे सात्त्वत्यारभटी पुनः । रसे रौद्रे च बीभत्से, सर्वत्र भारती ॥

३. रथी सूतेन चायुष्मान्पूज्यैः शिष्यात्मजानुजाः । वत्सेति तातः पूज्योऽपि सुगृहीताभिधस्तु तैः ॥

**प्र-१० नायिकायाः भेदं विलिख्य स्वकीयानायिकायाः निरूपणं कुरुत ।** **०८**

**अथवा**

**नायिकानां का अष्टावस्था – इति वर्णयत ।**

**प्र-११ प्रदत्तासु द्वयोः टिप्पणी विधेया ।** **०४**

१. सम्फेटः ।

२. संलापकः ।

३. नर्मस्फिञ्जः ।

४. औदार्यम् ।

**प्र-१२ पञ्चप्रश्नानाम् एकवाक्येनोत्तरं लिखत ।** **०५**

१. नायकायाः कति भेदाः?

२. दशरूपकम् कति प्रकाशेषु विभक्तम्?

३. नायिकानाम् अवस्थाः कति सन्ति?

४. मुग्धायाः कति भेदाः?

५. कैशिकीवृत्तेः कति अङ्गानि भवन्ति?

६. द्वितीयप्रकाशस्य कारिकासङ्ख्या का?

७. स्त्रीणां अयत्नजाः कति अलङ्काराः सन्ति?